नैकको यायान्न वार्य्यञ्जलिना पिबेत् । न दध्युद्धृतसारं च भक्षयेद्दधि नो निशि । स्त्रीधर्म्मिणीं नाधिवसेत् नाद्यादा तृप्ति रात्रिषु । तौर्य्यत्रिकप्रियो नस्यात् कांस्ये पादौ न धावयेत् । न धारयेदन्यभुक्तं वासश्चोपानहावपि । न भिन्नभाजनेऽश्नीयान्नाग्न्यादिपरिदूषिते । आरोहणं गवां पृष्ठे प्रेतधूमं सरित्तरम् । बालातपं दिवास्वापं त्यजेद्दीर्घं जिजीविषुः । स्नात्वा न मार्ज्जयेद्गात्रं विसृजेन्न शिखां पथि । हस्तौ शिरो न धुनुयान्नाकर्षेदासनं पदा । श्राद्धं कृत्वा परश्राद्धेऽश्नीयात् ज्ञानविवर्ज्जितः । दातुः श्राद्धफलं नास्ति भोक्ता किल्विषभुग्भवेत् । नोत्पाटयेल्लोमनखं दशनेन कदाचन । करजैः करजच्छेदं तृणच्छेदं विवर्ज्जयेत् । शुभाय न यदायत्यां त्यजेत्तत्कर्म यत्नतः । अपद्वारे न गन्तव्यं स्ववेश्मपरवेश्मनोः । क्रीड़ेन्नाक्षैः सहासीत न धर्म्मघ्नैर्न रोगिभिः । न शयीत क्वचिन्नग्नः पाणौ भुञ्जीत नैव च । आर्द्रपादकरास्योऽश्नन्दीर्घकालं च जीवति । संविशेन्नार्द्रचरणोनोच्छिष्टः क्वचिदाव्रजेत् । शयनस्थो न चाश्नीयान्न पिबेन्न जपेद्द्विजः । सोपानत्कश्च नाचामेन्न तिष्ठन् धारया पिबेत् । सर्व्वं तिलमयं नाद्यात्स्वायं शर्म्माभिलाषुकः । न निरीक्षेत विण्मूत्रे नोच्छिष्टः संस्पृशेच्छिरः । नाधितिष्ठेत्तुषाङ्गार भस्मकेशकपालिकाः । पतितैः सहसंवासः पतनायैव जायते । श्रावयेद्वैदिकं मन्त्रं न शूद्राय कदाचन । ब्राह्मण्याद्धीयते विप्रः शूद्रोधर्म्माच्च हीयते । धर्म्मोपदेशः शूद्राणां स्वश्रेयः प्रतिघातयेत् । द्विजशुश्रूषणं धर्म्मः शूद्राणां हि परोमतः । कण्डूयनं न शिरसः पाणिभ्यां शुभदं मतम् । न ताडयेत् कराभ्यां च क्रोशनं केशलुञ्चनम् । अशास्त्रवर्त्तिनोभूपाल्लोभात् कृत्वा प्रतिग्रहम् । ब्राह्मणः सान्वयोयाति नरकानेकविंशतिम् । अकालविद्युत्स्तनिते वर्षर्त्तौ पांशुवर्षणे । महावातध्वनौ रात्रावनध्यायाः प्रकीर्त्तिताः । उल्कापाते च भूकम्पे दिग्दाहे मध्यरात्रिषु । सन्ध्ययोर्वृषलोपान्ते राजचन्द्रस्य सूतके । दर्शेऽष्टकासु भूतानां श्राद्धिकं प्रतिगृह्य च । प्रतिपद्यपि पूर्णायां गजकुम्भत्रा कृतान्तरे । खरोष्ट्रक्रोष्टुविरुते समवाये रुदत्यपि । उपाकर्म्मणि चोत्सर्गे नावि मार्गे तरौ जले । आरण्यकमधीत्यापि वाणसाम्नोरपि ध्वनौ । अनध्यायेषु चैतेषु नाधीयीत द्विजः क्वचित् । कृतान्तराशो न पठेद्वैकाखुश्वाहिवभ्रुभिः । भूताष्टम्योः पञ्चदश्योर्ब्रह्मचारी सदा भवेत् । अनायुष्यकरञ्चेह परदारोपसेवनम् । पर्व्वद्भिभिः परित्यक्तमात्मानं नावमानयेत् । सदोद्यमवतां यस्माच्छ्रियोविद्या न दुर्लभाः । सत्यं ब्रूयात् प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम् । प्रियं च नानृतं ब्रूयादेष धर्म्मो-घटोद्भव ! । भद्रमेव वदेन्नित्यं भद्रमेव विचिन्तयेत् । भद्रैरेव हि संसर्गोनाभद्रैश्च कदाचन । रूपवित्तकुलैर्हीनान् सुधीर्नाधिक्षिपेन्नरान् । पुष्पवन्तौ न वीक्षेत त्वशुचिर्ज्योतिषाङ्गणम् । वातवेगं मनोवेगं जिह्वावेगञ्च वर्ज्जयेत् । उत्को च द्यूतदौत्यार्त्तद्रव्यं दूरात् परित्यजेत् । गोब्राह्मणाग्नीनुच्छिष्टः पाणिना नैव संस्पृशेत् । न स्पृशेदनिमित्तं च खानि स्वानि त्वनातुरः । गुह्यजान्यपि लोमानि तत्स्पर्शादशुचिर्भवेत् । पादशौचोदकं मूत्रमुच्छिष्टान्नोदकानि च । निष्ठीवनञ्च श्लेष्माणं गृहाद्दूरं विनिःक्षिपेत् । अहर्निशं स्मृतेर्जप्याच्छौचाचरनिषेवणात् । अद्रोहरत्यागत्या च पूर्व्वजन्म स्मरेद्द्विजः । वृद्धान् प्रयत्नाद्वन्देत दद्यात्तेषां स्वमासनम् । विनम्रधमनिस्तस्मादनुयायाद्व्रतस्थतान् । श्रुतिभूदेवदेवानां नृपसाधुतपस्विनाम् । पतिव्रतानां नारीणां निन्दां कुर्य्यान्न कर्हिचित् । न मनुष्यस्तुतिं कुर्य्यान्नात्मानमवनामयेत् । अभ्युद्यतं न प्रणुदेत्परमर्म्माणि-नोच्चरेत् । अधर्म्मादेधते पूर्व्वं विद्वेष्टृनपि संजयेत् । सर्वतोभद्रं पश्येच्च ततोनश्येच्च सान्वयः । उद्धृत्य पञ्च मृत्पिण्डान् स्नायात् परजलाशये । अनुद्धृत्य च तत्कर्त्तुरेनसः स्यात्तुरीयभाक् । श्रद्धया पात्रमासाद्य यत्किञ्चिद्दीयते वसु । देशे काले च विधिना तदानन्त्याय कल्पते । भूप्रदो मण्डलाधीशः सर्वत्र सुखितोऽन्नदः । तोयदाता सदा तृप्तो रूपवान् रूप्यदो भवेत् । प्रदीपदो निर्मलाक्षो गोदातार्य्यमलोकभाक् । स्वर्णदाता च दीर्घायुस्तिलदः स्याच्च सुप्रजाः । वेश्मदोऽत्युच्चसौधेशोवस्त्रदश्चन्द्रलोकभाक् । हयप्रदोदिव्ययानोलक्ष्मीवान् वृषभप्रदः । सुभार्य्यः शिविकादाता सुपर्य्यङ्कप्रदोऽपि च । धर्मैः सर्वर्द्धिभाक् नित्यमभयप्रदर्द्दर्शिता । ब्रह्मदोब्रह्मलोकेज्योब्रह्मदः सर्व्वदोमतः । उपायेनापि योब्रह्म दापयेत्सोपि तत्समः । श्रद्धया प्रतिगृह्णाति श्रद्धया यः प्रयच्छति । स्वर्गिणौ तावुभौ स्यातां पततोऽश्रद्धया ह्यधः । अनृतेन क्षरेद्यज्ञस्तपोविस्मयतः क्षरेत् । क्षरेत्कीर्त्तनतोदानमायुर्विप्रापवादतः । गन्धपुष्पकुशान् शय्यां शाकं मांसं पयोदधि । मणिमत्स्यौ गृहं धान्यं ग्राह्यमेतदुपस्थितम् । मधूदकं फलं मूलमेधांस्यभयदक्षिणाम् । अभ्युद्यतानि ग्राह्याणि त्वेतान्यपि निकृष्टतः । दासनापितगोपालकुलमित्राद्धसीरिणः । भोज्यान्नाः शूद्रवर्गेऽमी तथात्मविनिवेदकः । दूरमानृण्यमापाद्य दे-